M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 684

Title: Tarka Bhasha

684

तर्कभाषा. by गोवर्धन.

: Tarka	: Bhāṣhā		: **Title**
:	:	Govardhan	: Author
:	:		: Editor
:	:		: Year, Vols.
:	:		: Publisher
684 :	:		: Remarks

तस्यकृत इत्यर्थः

पदार्था एतस्य ग्रंथस्याऽभिधेयाः मीमांसायाइव वेदवैशद्याय प्रवृत्ताया धर्मः॥ नन्वसावस्त्येव विशदेति
किमर्थं तत्र प्रवृत्तिरिति चेत्रीकात्कत्वयेनं क्षिप्तयुक्त्यन्वितत्वे न्यायविद्याविशेषणमुपात्तं या संक्षिप्ता सा रा द्रता युक्त्य
न्विता यस्ता कथं स्यात्तोविदितत्तदर्थं प्रवृत्तिरुचितेतिभावः। एवं च संक्षिप्ता या सा युक्त्यन्विता चेति संक्षिप्तयु
क्त्यन्विता संक्षिप्तयुक्त्यन्विता या सा तर्कविद्या तथा च संक्षिप्तयुक्त्यन्विततर्कभाषेति विग्रहः। नन्वाभाष्यकारादिभि
रेव सतस्यावेव ध्वंकृतं किमर्थं तत्र प्रयत्न इत्यत आह। बालोपि न्यायनये प्रवेशं वांछति। भाष्यादिस्तु न बाल
व्युत्पादनक्षमः कठिनत्वादिति भावः। कोमलमतीनां सामर्थ्याभिकत्वाद्दित्वर्थं तु बालशब्देनो

गो०व० विषयिणी चेत्यर्थः एतच्छास्त्रकर्त्रा एतच्छास्त्रांतर्गतिचेनोद्देशादित्रितयं कृतवानिति नावः तथाचासमाप्ति त०जो०व०
रपि त्रितयवैशद्याय प्रपन्नः कर्त्तव्य इत्यर्थादागतमेव इदानीं तर्करसिकप्रमोदार्थं स्वितै किं विद्धि वायीत्ता
ननु तत्त्वज्ञानान्निःश्रेयसमित्येवं किमिति न कृतं व्यर्थमधिकमिति चेत्। यद्येवं तत्त्वा मोक्षेऽत्पाद्यते तदैव प्रा
३॥ प्याप्तपि न ह्यसिद्धस्य व्यादेरिव प्राप्तौ विलंब इति बोधयितुमधिगमपदोपादानात्। ननु तत्त्वज्ञानस्य मोक्ष ॥३
जनकत्वे शास्त्रेपि न शास्त्रस्य तत्प्राप्तिरिति चेत्। तच्च ज्ञायतेनेनेति व्युत्पत्त्या तत्त्वज्ञानपदेन शास्त्रस्यो
पात्। ननु तर्हि शास्त्रादित्येवं नोक्तं कथं रूढपदात्। झटित्यर्थप्रत्ययो न वोतीति चेत्। न। व्यापारलाभार्थं तथो

८

२३

पादानात्। शास्त्रेण तत्त्वज्ञानमुत्पाद्य मोक्षजननात्। अस्यार्थस्य शास्त्रादित्यनेनालाभात्। ननु शिष्यत इ
ति शास्त्रं तथा च प्रकृतेप्यनुशासनरूपो व्यापारो लभ्यत एवेति चेत्। न। एवं त्वध्यापकस्य मुक्तिः स्यान्न च ध्येतुः
ऽनुशासनरूपस्य व्यापारस्याध्यापकसंबद्धस्यैव प्रतीतेः। व्यापारकयोः सामानाधिकरण्यस्योत्सर्गिकत्वा
त्। तत्त्वज्ञानादिति पंचमीनिर्देशेन शास्त्रस्य मोक्षजनकत्वात्। तद्भिन्नसाक्षात्। दूरं विनष्टस्य शब्दात्मकस्य
कालांतरस्थायि मोक्षलक्षणफलं प्रति साक्षाज्जनकत्वस्य वक्तुमशक्यत्वात्। नापि परंपरया। द्वाराभावात्। न च ४
मिथ्याज्ञानध्वंसो व्यापारः मोक्षवत्तस्यापि कालांतरभावित्वात्। ज्ञानसाध्यत्वेन साक्षाच्छास्त्रासाध्यत्वाच्च। नापि मन

ज्यो.वर.

तैः

ननिदिध्यासनं तच्च साक्षात्कारः। अनुमितिस्मरणप्रत्यक्षरूपत्वेन तेषां शाब्दप्रमाणात्मकशास्त्राजन्यत्वात्॥
अथ शाब्दत्वानुमितित्वादीनामेकत्रवृत्तिप्रसंगात्। नापि श्रवणं तस्य श्रुतिवाक्यसाध्यत्वात् किंतु प्रयोजकत्वेपंचमी
शास्त्रेणानुमितिरूप[illegible]नजनकलिंगज्ञानजननात्। इष्टप्रयोजनकताज्ञानमेव प्रवर्तकं लाघवात् न तु साधनता
ज्ञानं अन्यथासिद्धिगर्भत्वेन गौरवात्। न ह्यर्थिनः स्तंडुलैः क्रये प्रवृत्तस्य नापतेः प्रयोजकत्वेन त्वपंचमालक्षे
णाक्षेत्रु यथा गौरनित्य इत्यत्र गोपदाद्धि शिष्टोपस्थितौ सत्यां विशेषणांशस्य नित्यत्वानित्यत्वानन्वयेपि विशेष्ये
तदन्वयः। शास्त्रे वस्तुतत्त्वोपस्थितत्वात्तैः विशेषणरूपैकदेशोपरं नोन्वयोयमपवर्गः। ननु नियमः पार्थ एव धनुर्ध

तथाप्रकृतेपि १ =परंतत्रोपस्थितत्वात् विशेषणरूपेणैकदेश १

४॥ ॥४

र इत्यत्रैकदेशोऽन्योन्याभावे विशेषणरूपएवपार्थान्वयात्। एवं च साकांक्षत्वनिराकांक्षत्वे एवान्वयानन्वययोः
प्रयोजके न तु पादार्थत्वतदेकदेशत्वे इति। एतेन कथं पंचम्याः प्रयोजकत्वप्राप्तिः सुपूर्वि न्नक्तौलक्षणा
नंगीकारादिति निरस्तं। तस्माच्छास्त्रमोक्षयोः प्रयोज्यप्रयोजकभावसंबंध एव न तु जनकभाव इति। तत्त्वं तत
त्वज्ञानमपि शास्त्रप्रयोज्यं नोत्पन्नमोक्षजनकं। किं तु मिथ्यादि ध्वंसक्रमेणेति मंतव्यं। तथा च सूत्रं दुःख
जन्मप्रवृत्तिदोषमिथ्याज्ञानानामुत्तरोत्तरापाये तदनंतरापायादपवर्गः। दोषो रागद्वेषौ मिथ्याज्ञानं स्पष्टं यद्युपा
दानात्। एवं च दुःखादीनां मिथ्याज्ञानांतानां कार्यकारणभावापन्नानां मध्ये मिमाद्यिमस्य करणस्य नाशो हृत्वेष्ट

त॰ गौव॰

र्वकार्यस्याभावेमोक्षहेत्वर्थः॥ अन्येतुतत्त्वंजानंतिइतितत्त्वज्ञाःपुरुषाः।तेषांतत्त्वज्ञानामितिषष्ठीसूत्रेवदंति॥
शार तन्नैसूत्रस्यपुरुषार्थसंबंधप्राप्तेः।नन्वेतस्मात्पुरुषार्थावगतौशास्त्रप्रवृत्तिः।प्रवृत्तेश्चोत्तरंचैतत्सूत्रपाठेपुरुषा
र्थावगतिरित्यन्योन्याश्रयः।इतिचेत्।न।वनगर्जितन्यायेनश्रुतात्सूत्रात्पुरुषार्थावगतौशास्त्रपाठेप्रवृत्तेन ११५
शास्त्रांतर्गततया।प्रथमसूत्रस्यापिपठनात्।प्रथमसूत्रेचसमासोनद्विगुर्नाप्यव्ययीभावः॥तादृशार्थयोगा
भावात्।नापिबहुव्रीहिःकर्मधारयो।अर्थासंभवात्।नापितत्पुरुषः।उत्तरपदार्थनिग्रहस्थानस्यापि।धर्म्ये
विवक्षितार्थहानिप्रसंगात्।किंत्वितरेतरद्वंद्वः।प्रत्यक्षादीनांस्वस्वप्रमालक्षणफलजनने परस्परनिरपेक्ष

५३

त्वमितिबोधयितुंप्रमाणानीतिबहुवचनं।सकलप्रमेयज्ञानस्यमोक्षहेतुतेतिज्ञापनायप्रमेयएकवचनं।सं
शयानांपरस्परनिरपेक्षाणांन्यायप्रवृत्तिकतेतिबोधनायत्रापिबहुवचनं।दृष्टांतेपिद्विवचनमेव।परस्परनिरपे
क्षस्यैवोदाहरणप्रयोजकत्वात्।सिद्धांतेबहुवचनं।स्वप्रयोजनेपरस्परानिपेक्षत्वात्।अवयवेष्वपिबहुवचनं।स्वे जो४
ष्टवाक्यार्थपरस्परनिरपेक्षत्वात्हेत्वाभासेस्वव्यापारेपरस्परनिरपेक्षत्वात्।बहुवचनं।तथाछलजातिनिग्रहस्थाने
ष्वपि।एवंचप्रमाणानिचप्रमेयंचसंशयाश्चप्रयोजनंचदृष्टांतोचसिद्धांताश्चअवयवाश्चतर्कश्चनिर्णयश्चवादश्च
जल्पश्चवितंडाचहेत्वाभासाश्छलानिजातयश्चनिग्रहस्थानानिचेतिनिबंधसंमतोविग्रहोध्यवसेयइतिसंक्षेपः।उ
श्च

ावद॰ लक्षण१ न३ त॰गौव॰

द्देशात्मकशास्त्रमाह॥ उद्देश इति नाम्ना वस्तुसंकीर्त्तनमित्युच्यमाने लक्षणात्मकेऽतिप्रसंग। तत्रापि नाम्ना वस्तुसंकीर्त्ति
पा २ नत्वात्। प्रमाकरणं प्रमाणमित्यादौ हि लक्षणात्मके शास्त्रे तत्र च प्रमाणमिति। लक्ष्यभागनिर्देशोऽस्य नाम्नास्त्वात्। तद्धा
रणाय नाममात्रेणेति। ननु मात्रपदेनान्यकरणकं वस्तुसंकीर्त्तनं वार्यतां। तद्वेपुरतिव्याप्तेः। लक्ष्यभागस्यापि नाम्ना
केवलेनाभिधानात्। न च प्रमाकरणमिति लक्षणभागेनापि लक्ष्यमुच्यत एव अन्यथा सामानाधिकरण्यानुपप ॥६
६॥ त्तिरिति वाच्यं॥ पृथिव्यां गंधो लक्षणमित्यादि लक्षणात्मकशास्त्रे लक्ष्यभागेऽतिव्याप्तेस्तत्र न केवलं लक्ष्याभिधानात्॥
लक्षणभागेनानभिधानत इति॥ चेत्। न। नाम्ना वस्तुसंकीर्त्तनमात्रमुद्देश इति भिन्नक्रमेण मात्रपदतात्पर्यात्॥
सं१ मे१

मात्रपदेन लक्षणादिभागव्यवच्छेदस्याभिप्रेतत्वात्॥ ननु किमर्थं लक्षणात्मकशास्त्रे लक्ष्यभागेऽतिव्याप्ति
र्वार्यतां। तस्यापि लक्ष्यत्वात्। लक्ष्यपदेन लक्ष्यमुद्दिश्य लक्षणविधानात्। अत एव परीक्षायां लक्षणभागो
पि लक्षणात्मकमेव शास्त्रं। तदतिरिक्तभागस्यैव परीक्षात्वं। न चैवं लक्षणाद्यंतर्गतोद्देशादिभिरेवोपप
त्तौ पृथगुद्देशादिप्रणयनानुपपत्तिरिति चेत्। न। न्यूनाधिकसंख्याव्यवच्छेदफलकत्वात् पृथगुद्देशस्य। ननु
तत्र न पृथगुद्देशस्य शक्तिः। तात्पर्यमात्रत्वं पृथगुद्देशस्यापि संभवतीति चेन्न। अपृथगुद्देशस्य लक्षणाभि
तत्वेन चरितार्थस्य तत्र तात्पर्यकल्पने मानाभावात्। पृथगुद्देशस्यापि लक्षणजिज्ञासाजनकत्वेनोप
ह१

गोवर्धनी

च १

क्षीणत्वात्। न तत्रैतात्पर्यमिति चेन्न। लक्ष्यनामस्येव लक्षणजिज्ञासाजनकसंगतत्वात्। अत एव पृथगुद्दे-
शस्य वैयर्थ्यत्वात् वैयर्थ्यं स्यात् किंचित्॥ ज्ञापयतीति न्यायेन तत्र तात्पर्यम्। एवं लक्ष्यनामस्यापि नोद्देशत्वे किमपि
बा धकमिति तन्न व्यवहाराजनकस्यैव बाधकत्वात्। ननु संकीर्तनं मोनिरुक्तग्रंथोद्देशव्यापकमिति चेन्न प्रति-
स्त्र४ ७॥ संधीयमानलक्षणवाक्याद्यसमभिव्याहृतनामोद्देशात्मकशास्त्रस्वरूपत्वात् लक्षणमिति। लक्षणात्मकं शा-
स्त्रमित्यर्थः। असाधारणेति। असाधारणधर्मप्रतिमाकं वाक्यं पृथिव्यां गंधवत्त्वं लक्षणमित्याद्याकारं लक्षणा-
त्मकं शास्त्रमित्यर्थः। असाधारणेति पदानुपादेन प्रमेयाणामभिधेयत्वं धर्म इत्यादिवाक्यातिव्याप्तिः। अभिधेयत्वा-

त० गोवर्ध० ॥७

तत्त्व १

दीनां केवलान्वयितया यावद्वृत्तितया लक्षणत्वेन प्रतिपादकस्य लक्षणात्मकशास्त्रत्वाभावात्। न च सा-
धारणो धर्म एव क इत्यत आह यद्वेति। व्यतिरेकित्वमेवासाधारणत्वमित्यर्थः। ननु लक्षणात्मकत्वं शास्त्रे न
लक्षणस्वरूपत्वं व्याघातात्। किंतु लक्षणप्रतिपादकत्वं। लक्षणत्वमपि व्यतिरेकिधर्मत्वं। तथा च व्यतिरे-
किधर्मप्रतिपादकं वाक्यं व्यतिरेकिधर्मप्रतिपादकं शास्त्रमित्यायातं। एवं च लक्ष्यतावच्छेदकलक्षणयोर-
भेद इति चेन्न। वाक्यत्वगर्भस्य लक्षणत्वात्। शास्त्रत्वगर्भस्य लक्ष्यतावच्छेदकत्वात्। वाक्यत्वशास्त्रत्वयोर्भे-
दस्य सर्वजनसिद्धत्वात्॥ यद्वेति येन रूपेण यल्लक्ष्यतावच्छेदकाक्रांतत्वेन यस्य यल्लक्षणं तत्तल्लक्षतावे

छेदकत्वं तस्य तल्लक्षणमनुपपद्यते न वेति विचारः परीक्षेत्यर्थः यथानुष्ठमर्यादया प्राप्यते। एवं च पृथिवीत्वे
न पृथिव्यां गंधवत्त्वेऽनुक्ते घटस्य गंधवत्त्वं तल्लक्षणमनुपपद्यते वा न वेति विचारः परीक्षा न तु वतीत्यापीति तथा
च परीक्षाप्रतिपादकं वाक्यं परीक्षात्मकं शास्त्रमित्यर्थः। ननु परीक्षाप्रतिपादकवाक्यत्वं शास्त्रबहिर्भूतेऽपि
वादिप्रतिवादिवाक्येऽतिप्रसज्यतीत्याह। शास्त्रविवक्षायां उलक्षितावच्छेदकलक्षणयोरत्नेदद्वि इति चेन्न। परी
क्षात्मकशास्त्रत्वेन व्यवहर्त्तव्यस्य लक्ष्यत्वात्। तेनेति। शास्त्रस्य त्रितयात्मकत्वेनोद्देशस्य च प्रथमत्वम
॥ त्वेनेत्यर्थः। तत्रापि प्रमाणादीनां लक्षणादौ कर्त्तव्ये ति१। प्रथममिति प्रथममुद्देशस्य सकलसाधकत्वेन प्रा

प्राधान्यादिति भावः। प्रमाकरणमिति। अत्रापि प्रमाकरणत्वेन व्यवहर्त्तव्यत्वं लक्ष्यतावच्छेदकमिति भावः।
तर्कज्ञानामित्यत्र तर्कशब्दे गोबलीवर्द्दन्यायेन तर्कस्याप्याहार्यविपर्ययरूपत्वान्निश्चयरूपत्वमस्येव
विपर्ययत्वात्। बलीवर्द्दसमभिव्याहृतं गोपदं यथा बलीवर्द्दभिन्नं गोपदार्थमाह। तर्कसमभिव्याहृ
तं विपर्ययपदं तर्कभिन्नं विपर्ययपदार्थमाहेति गोबलीवर्द्दन्यायार्थः। इदानीं प्रमाप्रमाणयोर्लक्षणं विचार्य
ते। तत्रादौ घटकत्वात् प्रमा विचार्यते। यथार्थानुभवः प्रमेति। ननु किमिदं याथार्थ्यं। न तावदर्थसादृश्यं
यथा कथंचित्सादृश्यस्य भ्रमेऽपि सत्त्वात्। प्रमेयत्वादीनां भ्रमाद्यैर्भ्रूवृत्त्यादौ भ्रमे च सत्त्वात्। समानधर्मस्यैव

साद्रूप्यत्वात्सकलार्थवृत्तिधर्माणां च प्रमायामप्यभावेनासंभवात्रजतत्वादीनां रजतभ्रमादावभावादि
ति चेन्नात द्वितितत्प्रकारकत्वस्य यथार्थस्य प्रवृत्तेर्विवक्षितत्वात्। तत्प्रकारकत्वमन्नचमात्रविवक्षायां
भ्रमेतिव्याप्तिःस्तद्वारणाय तद्वतीति। तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वं तदर्थः। त्वमस्थरजतेत्वादिप्र
कारकत्वे सत्यपि न रजतत्वादिमद्विशेष्यके। शुक्त्यादीनां विशेष्यकत्वात्। अत्रैव पदार्थीतिगंतशानात्र
पादाने रजतविषयणामिथ्यायां रजतत्ववति रजतत्वप्रकारिकायामतिव्याप्तिः रजत्ववद्विशेष्यकत्वमात्रवि
वक्षायां शुक्तित्वप्रकारके रजतविशेष्यके ज्ञानेतिव्याप्तिस्तद्वारणाय रजतेत्वप्रकारकेति एवं च रजत

॥९

विशेष्यकं रजतत्वप्रकारकं स्मृतिभिन्नं ज्ञानं रजतप्रमेति रजतप्रामलक्षणं पर्यवस्यति एवं घटादिप्रमा
पि लक्षणीया॥ ननु तद्वतीत्याद्यनुगतं लक्षणं किमित्यविपर्स्ययननुगतलक्षणं निर्मीमिति चेन्न। तच्छब्दवाच
स्यैकस्याभावेनाननुगतलक्षणाभावेनाननुगतेलक्षेऽननुगतस्यैव लक्षणस्य तदर्थत्वात्। नन्वत्राकाश
त्वमिति भ्रमायामाकाशप्रकारिकायामव्याप्तिः शरीरीकाशत्वस्याकाशवत्वेऽभावेनाकाशवत्याकाशप्रका
रकत्वाभावदिति चेन्न तत्संबंधवति तत्प्रकारकत्वस्य विवक्षितत्वात्। आकाशसंबंधस्याकाशत्वे सत्वात्
ननु समवायसंबंधेन जलविशेष्यकगंधप्रकारकं ज्ञानं प्रमास्या। संयुक्तसमवायेन गंधस्यापि जलसंबद्धत्वात्

त॰ जीव

अपि चय। सर्वैरूपामत्र आसीत्तत्र रक्ततादशायामिदानीं रूपामिति प्रतीतिः प्रमा स्यात्। न च प्रकारस्य विद्यमान
ताविवक्षिता रूपामः सर्वैरूपामिति प्रतीतेरमापत्तेः ज्ञानकाले प्रकारस्याविद्यमानत्वादिति चेन्न। यदवच्छेदे
नयसंबंधपुरस्कारेण यत्र यत्संबंधं तदवच्छेदेन तत्संबंधपुरस्कारेण तत्र तदनुभवस्य प्रमात्वात् सं
मवायेन जले गंधज्ञानेवनसंयुक्तसमवायपुरस्कारः संयुक्तसमवायेन चतत्तज्ज्ञानं प्रमैव। इदानीं रूपा
१० मिति प्रतीतिस्तु न। यदनवच्छेदेन रूपामं रूपं तिष्ठति तदनवच्छेदेन। एतत्कालानवच्छेदेन हृतौ तदवच्छेदस्य
कृतानादितिदिक्। प्रमाकरणं च प्रमाणं। ननु किं करणत्वं मल्लोक्तं प्रकृष्टकाकारणत्वमेव। नाप्रकर्ष॥

त॰ जीव॰ ॥१०
२५

रूपेवाज्ञानात्। ननु व्यापारवत्त्वमेवेति चेन्न। आत्मादावतिव्याप्तेः। आत्ममनोयोगादेर्व्यापारस्य सत्वात्। ननु
फलएवाग्रेऽनुपपत्तिः। यस्मिन् सत्यपि व्यासंगदशायां विलंबेन क्रियाजायते तत्करणमित्येवमिति चे
न्न। इंद्रियादीनां करणत्वापत्तेः। तस्मिन् सत्यपि व्यासंगदशायां प्रमानुत्पत्तेरिति चेन्न। व्यापारवत्वस्येकरण
त्वात्। नचात्मादावतिव्याप्तिः। तत्कारणायविवक्षातरकरणत्वात्। तथाहि। अनुभवत्वव्याप्यव्यवच्छिन्नकार्य
तानिरूपितकारणताश्रयत्वे सत्यतिप्रमाकरणत्वं। आत्मादौ च नानुभवत्वव्याप्यजात्यवच्छिन्नायां कार्य
ता। आत्मत्वादिना कारणत्वस्य जन्यज्ञानत्वेन जन्यानुभवत्वेनवा जन्यात्मविशेषगुणत्वेनवा कार्यत्वस्य ॥

त॰ गो॰ वर

११॥

स्त्वात्। प्रमाणेषु तिष्ठति शाब्दत्वोपमितित्वानुमितित्वानां शाब्दादिप्रमाणजन्यतावच्छेदकानामनुभवत्व
व्याप्यजातित्वात्। इंद्रियजन्यतावच्छेदकं च यद्यपि न साक्षात्त्वं। नित्यवृत्तित्वात्। जन्यसाक्षात्त्वं न जातिः। तथापि
चाक्षुषत्वादि तिष्ठत्येव। चक्षुत्वादिना कारणत्वस्य चाक्षुषत्वादिना कार्यत्वस्य सत्वात्। जातिपदं च तेन ध
र्मपदोक्तावालोकेऽतिव्याप्तिः। आलोकत्वेन कारणत्वस्यांधकारेतरविषयकचाक्षुषसाक्षात्कारत्वेन का
र्यत्वस्य सत्वात्। तस्य च धर्मस्यानुभवत्वाव्याप्यत्वात्। विषयालोकसंयोगस्य कारणत्वेन व्यापारवत्त्वा
च्च प्रमाकरणत्वमित्यत्र व्यापारानुपादाने लिंगपरामर्शादौ व्यापारेऽतिव्याप्तिः। अत्र प्यनुमितित्वजातावच्छि
न१

त॰ गो॰ वर॰

स्ता॰ २

॥११

श्री॥

न्नकातास्त्वात्। प्रमेत्यत्र यथार्थत्वानुपादाने सदोषचक्षुरादावतिव्याप्तिः। तत्रापि चक्षुरादिनैव प्र
कारणत्वस्य चाक्षुषत्वादिनैव कार्यत्वस्य सत्वात्। अनुभवत्वव्याप्येति च न व्यर्थं सुखत्वजातावच्छिन्न
कार्यत्वप्रतियोगिककारणतायाः आत्मन्यपि सत्वात्तन्न कृत्वनुभवत्वसमानाधिकरणेत्येतावदेवास्तां
व्यर्थं नैयत्यमिति चेन्न तथैव विवक्षितत्वात् विस्तरस्त्वन्यस्यां मत्कृतोपदिष्टे तौ बाध्यवसेयः। इदं चाव
सेयं प्रमाणलक्षणप्रमोतर्गतांशा न गर्भः स्मृतित्वभिन्नत्वभागश्च न देयः। न चैवं करणं आत्मादौ स्मृति
करणे च संस्कारेतिव्याप्तिः। तत्र सत्यं तस्यैवाभावात् एवं चैवं लक्षणार्थः पर्यवसन्नः। अनुभवत्वसमाना

धिकरणजात्यवच्छिन्नकार्यत्वप्रतियोगिककारणतानाश्रयत्वे सति व्यापारवत्त्वे सति तत्कृतितत्वकारकका
रणत्वं प्रमाणमिति। न चान्यत्वस्य समानाधिकरणे यत्र ज्ञानत्वस्य समानाधिकरणेऽपेतावदेवास्त्वामितिवा
च्यं। ज्ञानत्वं वदन्त्यत्वस्यापि जातित्वात्। तेनेति नन्तु किमन्यथासिद्धत्वं। अन्यथासिध्यत्वाव इति चेन्न।
अन्यथासिद्धेरेवाज्ञानात्। नन्तु मूलोक्तमन्यत्रोपक्षीणत्वमिति चेन्न तस्याप्यनिर्वचनात्। कार्यांतरज
नकत्वमेवेति चेन्न दंडादीनामपि घटे जनकत्वापत्तेः। तेनापि निजरूपादिजननात्। यस्य कारण
त्वांगीकारकल्पना गौरवं तदन्यथासिद्धमिति चेन्न। एवं कारणत्वेन कारणत्वगर्भस्यात्ततथात्वा

द्धप न्यथा

त्वाश्रय इति चेत्। अत्राहुः। अन्यथासिद्धिपंचकरोहितस्यानन्यथासिद्धिपदेन विवक्षितत्वात्। सिद्धपं
चकं चेदं। अन्यथा च त्वं नियतपूर्ववर्त्तिन एव कार्यसंभवे तत्सहभूतत्वमन्यथासिद्धत्वमिति यथा
यत्र घटे नियतपूर्ववर्त्तीरासभस्तत्र घट रचेनरासभत्वेन कारणत्वे स्वीक्रियमाणे यत्र ह्यन्यत्र घटांत
रे क्लृप्तनियतपूर्ववर्त्तिनो दंडादयस्तैरेव तत्र घटसंभवे दंडादिसहभूतत्वं रासभस्यान्यथासिद्धत्वं। अ
न्यं प्रति पूर्ववर्त्तित्वे गृहीत यत्रान्यं प्रति पूर्ववर्त्तितायाः स्य तेन तदन्यथासिद्धमित्यपरा यथा घटादिकं प्र
त्याकाशस्य। आकाशस्याकाशत्वेन रूपेण घटादिकं प्रति कारणतावाच्या आकाशत्वं च शब्दकार

णं चं कारणं चं च पूर्ववर्त्तिता घटं प्रति तं तथा यथा दंडं प्रति पूर्ववर्त्तित्वे गृहीत एव घटादिकं प्रति पूर्ववर्त्ति
त्वग्रहो भवति। घटादावाकाशोऽन्यथासिद्धः। ननु कथमाकाशस्य शब्दकारणं यदि शब्दकारणत्वेनैव
तदात्माश्रयः। यदि शब्दव्यतिरिक्तद्रव्यादिना प्रकारांतरेण तदा तेन रूपेण घटादिकारणत्वेऽपि

नान्यथासिद्धिरिति चेन्न अत एव एतदन्यथासिद्धिस्थले अवश्यकल्प्यमाननियतपूर्ववर्त्तिन एव कार्य
संभवे तत्सहभूतत्वमन्यथासिद्धत्वमित्यपि तस्यापि प्रतिनिरुक्तिरिति चात्। शब्दं प्रत्याकाशत्वेनाका
शमन्यथासिद्धं तत्राकाशस्याप्यवश्यक्लृप्त्यकल्प्यमानत्वेनानन्यथासिद्धत्वात् शब्दे यदेतद्दंडादौ वा वश्य

कल्प्यमानत्वेन तत्सहकृतत्वेनाकाशस्याप्यन्यथासिद्धत्वात्। यं पुरस्कृत्य यस्य पूर्ववर्त्तिता गृह्यते
तत्तेनान्यथासिद्धमित्यन्यथा।। यथा तंतुं पुरस्कृत्य तंतुरूपस्य पूर्ववर्त्तिता गृह्यते तंतुना तंतुरूपमन्य
थासिद्धं। यथा यमादायैव यस्य पूर्ववर्त्तिता गृह्यते तेन तदन्यथासिद्धमितीतरत्। यथा दंडत्वमादाये
व दंडपूर्ववर्त्तिताग्रहे दंडत्वमन्यथासिद्धं। जनकपूर्ववर्त्तित्वे गृहीत एव यत्र जन्यपूर्ववर्त्तिताग्रहस्त
दन्यथासिद्धमितीत्यपरा। कुलालपितृत्वेन कुलालपितुर्घटकारणतायां घटजनकं कुलालं प्रति पूर्वव
र्त्तित्वे गृहीत एव जन्यं घटं प्रति पूर्ववर्त्तित्वग्रहात्। कुलालजनकपुंस्त्वस्यैव कुलालपितृत्वात् कुलालपि

त॰ग्रो॰बर घ॰

१४॥

तान्यथासिद्धं एतदन्यथासिद्धपंचकराहित्ये सति नियतपूर्ववर्त्तित्वमेव कारणत्वं । अनन्यथासिद्धपूर्वव
र्त्तित्वमात्रघटितलक्षणोक्तौ किं दूषणं येन नियतपदोपादानमिति चेन्न । घटमात्रं प्रति रासभकारणतापत्ति
रिव । नहि घटमात्रे रासभोऽन्यथासिद्धः अन्यत्क्लृप्तेत्याद्यन्यथासिद्धिरितित्र वाच्या । न च घटविशेषमात्रे रासभ
स्य सामान्यं वति घटमात्रापेक्षायाश्च न्यः ॥ घटादिस्तत्र क्लृप्तकारणात् घटासंभवादिति दिक् । अन्याय्यति
अनन्यथासिद्धान्नियतपश्चाद्भावित्वमित्यर्थः । यो यस्मादनन्यथासिद्धान्नियमतः पश्चाद्भवति स त
स्य कार्यः घटस्तु न रासभकार्यः रासभस्यान्यथासिद्धत्वादित्याशयः कार्येति । कार्येणानुकूलौ कार्यान्वय

व्यतिरेककालपूर्वकालौ यावन्वयव्यतिरेकौ तावस्यातिकार्यानुकूलतान्वयव्यतिरेकितकारणमित्यर्थः ॥
यदन्वये यदन्वयो यद्व्यतिरेके तद्व्यतिरेकस्तत्तस्य कारणमिति पर्यवस्यति यदन्वये यदन्वय इत्युक्तौ रासभेऽतिव्या
प्तिः कदाचिद्रासभान्वयेऽपि घटान्वयात् अतः यद्व्यतिरेके यद्व्यतिरेक इत्युक्तावपि रासभव्यतिरेकेऽपि कद
चिद्घटव्यतिरेकात् इत्यन्वयोपादानं । नन्वन्वयोपादानेऽपि रासभेऽतिव्याप्तिः घटसामग्रीकाले रासभान्व
येऽरासभान्वयात् तद्विरहकाले रासभव्यतिरेकात् अन्वयव्यतिरेकप्रयुक्तौ यद्व्यतिरेक इति विव
क्षितं रासभव्यतिरेकप्रयुक्तस्तु न घटव्यतिरेकः किंतु दण्डादिव्यतिरेकप्रयुक्त इति वाच्यं घटव्यतिरे

त॰ग्रो॰व॰

॥१५

केऽप्रयुक्तत्वं हि तदुत्तरसमयसत्त्वं तत्रास्य घटसामग्रीविरहकालीनरासभव्यतिरेकानंतरं घटव्यति
रेकसत्त्वात् । न च जन्यत्वं प्रयुक्तत्वमिति वाच्यं । दंडादावव्याप्तेः घटव्यतिरेकस्य प्रागभावात्मकत
या दंडव्यतिरेकाजन्यत्वात् । न च यदन्वयो यदन्वयजन्य इति विवक्षितमिति वाच्यं घटान्वयस्य घट ॥१५
संबंधरूपतया तस्य घटस्वरूपद्वयात्मकतया तद्गणस्य दंडान्वयाजन्यत्वेन दंडेऽव्याप्तेः सकल
१५॥ नियतपूर्ववर्त्तिसमवधाने सति यदन्वय इत्यादि विवक्षितं न च दं रासभेन गतं दंडादिसमवधाने रा
सभव्यतिरेके घटव्यतिरेकाभावादिति वाच्यं । दंडादावव्याप्तेः दंडादिसकलसमवधाने दंडव्यति

रेके घटव्यतिरेकाभावात् दंडव्यतिरेकस्यैवाभावात् । न च स्वेतरसकलसमवधाने इत्यादि विवक्षितं सं
भवति चेतद् दंडे दंडेतरचक्रादिसमवधाने दंडव्यतिरेके घटव्यतिरेकात् ॥ न तु रासभेन तदितरदंडादिस
मवधाने तद्व्यतिरेकेऽपि घटस्यैव जायमानत्वादिति वाच्यं दंड एवाव्याप्तेः दंडेतरदंडत्वचक्रसंयोगादिसमव
धाने दंडव्यतिरेकस्यैवाभावात् । न च स्वव्याप्येतरेत्यपि विवक्षितं गच्छति चैवं दंडे । दंडदंडव्याप्यसंयोगा
दि चक्रादिसमवधाने दंडव्यतिरेके घटव्यतिरेकादिति वाच्यं तंतुरूपादावन्यथासिद्धेऽतिव्याप्तेः तंतुरूपव्या
प्यं चादि इतरसकलसमवधाने सति तंतुरूपव्यतिरेकेऽपि पटव्यतिरेकात् । ततो रपि सामपिकव्याप्यातंतुरूप
रे१

व्याप्यत्वात् आद्यलक्षणे व्यभिचारः स्थूलकालोपाधिमादाय व्याप्तिस्वीकारात् न भवति हि यस्मिन् दण्डे निमेषे वा ते
उत्तरत्र व्यवस्थितं तदुरूपमिति व्याप्तिग्रहः। नैवानन्यथासिद्धत्वापि विशेषणं। अन्वयव्यभागवैयर्थ्यात्। अत्र क्रमः
लक्षणद्वये तात्पर्यं अनन्यथासिद्धनियततयदन्वयेयन्वयव्यतिरेकं। अत्र नियतपदोपादानं सर्वत्र न्यायेन रासभेनेति हा१
व्याप्तिवारकं स्वेतरस्य व्याप्येतरस्य केवलनियतत्वेन सर्वदा वृत्तिसमवधानेन अनन्यथासिद्धयद्व्यतिरेके यद्व्यतिरे
१६॥ क इत्यपरं। अत्रापि घटमात्रे अन्यथासिद्धे रासभेनेति व्याप्तिवारणाय समवक्षमानं तमितिस्वरूपः। तत्र व्यतिरेक १६
ग्रन्थे लक्षणमाकाराद्यव्याप्त्या दूषयति नित्येति। नित्यत्वान्न कालिको व्यतिरेकः व्यापकत्वान्न दैशिक इत्यर्थः॥

तत्रेति। स्वसमवेतानन्यथासिद्धनियतपूर्ववर्त्तित्वं समवायिकारणत्वमित्यर्थः। नैवानन्यथासिद्धेति व्यर्थं घ
टस्य घटत्वभिन्नत्वे रूपेण निजरूपादिसमवायिकारणतापत्तेः तेन रूपेण तदन्यथासिद्धं घटत्वेन रूपे
णारोपकेऽपेक्षमाणत्वात् घटकार्यसंबन्धे घटत्वभिन्नत्वे न तस्यैवान्यथासिद्धत्वात् लाघवेन घटत्वेनैवाव
रोपकत्वमानत्वात्। न च न तदन्यथासिद्धं किंतु गौरवादेव कारणमिति वाच्यं। गौरवेणाप्यनन्यथासिद्धि
भागस्यैव दूरीकरणात्। अनन्यथालक्षणस्य गौरवस्य कारणत्वाविरोधित्वापत्तेरिति। संबंधमात्रस्य स
मवायत्वे मन्वानम् आक्षिपति। नन्विति। ययोर्मध्य इति। ननु विनश्यत्ताविरहः। किंयत्किंचिद्विनश्यत्ताविर ह०

न्गोवर

ः प्रकृतं संबंधिनोर्विनश्यत्ताविरहो वा सकलविनश्यत्ताविरहो वा नाद्यः घटघटरूपयोः समवायाभावाप
त्तेः पटरूपविनश्यत्ताविरहवतोऽपि पटरूपस्यासमवायिकारणनाशाघटितस्य विनश्यत्तायामपराश्रितत्वा
भावात्॥ न द्वितीयः नित्यसंबंधिनोर्विनश्यत्ताऽप्रसिद्धेः न तृतीयः असंभवात्तत्संबंधिकाले सकलविनश्यत्ता
१७॥ विरहस्याप्रसिद्धेः यत्किंचिद्विनश्यत्तायाः सत्वादिति न च सर्गाधिकार्योत्पत्तिदशायां न कस्यापि विनश्यत्तेति ॥१७
वाच्यं इदानीं तन्नासंबंधिनोः समवायाभावापत्तेरिति चेन्न योर्द्वावसंबंधावेकस्मिन्काले नष्टस्तयोः स
मवायानपगमात् समवायलक्षणे चाग्रे निरूपणीयं अनाश्रिता एवेति क्षणमात्रमिति शेषः विनश्यत्त्वाद्वि

ति ननु विनाशसामग्रीत्येतदेवास्त्वव्यर्थमधिकमिति चेन्न इष्टापत्तेः समानकालोत्पत्तौ वेति न चेदम
संगतं समानकालोत्पत्तिकानामपि घटपटादीनां सामग्रीभेदात् न च तत्र समवायिकारणस्यैकत्वेऽप्यसमवा
यिकारणभेदाद्भेदः रूपं प्रति रूपस्य रसं प्रति रसस्यासमवायिकारणत्वादिति वाच्यं तत्रतेऽपि घटत्वा
द्घटं प्रति कपालद्वयसंयोगस्य घटरूपं प्रति च कपालरूपस्यासमवायिकारणत्वादिति चेन्न फलिता
र्थानवबोधात् गुणगुणिनोः समानकालोत्पत्तौ यद्गुणिनः समवायिकारणं तदेव रूपादेर्गुणस्यापि वाच्यं
गुणिनः समानकालत्वे न समवायिकारणत्वाभावस्य तत्त्वैवोक्तत्वात् एवं च कपालरूपघटरूपयोः

४२

त॰ गोचर॰ समानसामग्रीकत्वं चेद्विवक्षितं समानसामग्रीकत्वादेतस्य च समानसमवायिकारणकत्वादित्यर्थः तथा च म॰
कपालमेव घटरूपस्य समवायिकारणं वाच्यं एवं च कपालरूपयोर्भेदो न स्यात् एकदैकस्मिन्समवा
यिकारणे रूपद्वयानंगीकारात् एवं चैवं मूलं ग्रंथास्तित्व्यक्तिः रूपगुणिनोः समानकालोत्पन्नो कपा
लरूपघटरूपयोः कपालसमवायिकारणकत्वेऽपि भेदो न स्यात् एकस्मिन्काले रूपभेदे समवायिकार ॥१८
१८॥ णभेदस्य प्रयोजकत्वादिति कारणभेदोपीति घटरूपकपालरूपयोरित्यर्थः ननु समवायिका
रणभेदः कपालरूपघटरूपयोरन्यथाप्युपपादितः कपालरूपे कपालरूपस्य घटरूपे घटरूपस्यैव स

मवायिनो कारणत्वादित्यत आह घटो हीति एवं घटरूपस्यापि न घटरूपकस्य कारणत्वं भेदादित्यर्थः
न च कथं भेदे कार्यकारणभावः शंकान्यैरनाशंकितत्वादिति वा संस्थानुपारव्याविधिर्न चेति कोरिका
माचार्यैरुक्तत्वात् नहीति प्रथमक्षणे घटो न चाक्षुषः घटविषयकलौकिकचाक्षुषज्ञानं प्रति घटस्यापि हे
तुत्वेनोत्तरक्षण एव तज्जन्यचाक्षुषज्ञानसंभवात् तस्मात्प्रथमक्षणे चाक्षुषः स्यादित्याशंकानुपपन्नेव यद्यपि
तथापि द्वितीयक्षणे रूपोत्पत्तौ द्वितीयक्षणे घटश्चाक्षुषो न स्यादित्याशंकार्थः परिहारस्तु यथा सगुणोत्पत्तिप
क्षे प्रथमक्षणे ग्रहणोपि न क्षतिस्तथा निर्गुणोत्पत्तिपक्षेपि द्वितीयक्षणे ग्रहेपि न क्षतिरिति इत्थमेव व्याख्याने

सर्वथानुपपत्तिः।यदि निर्गुण उत्पद्येत तत्प्रथमक्षणे चाक्षुषः स्यादिति हि यथा॥ ततः कार्यः। सच तदा स्याद्
दि प्रथमक्षणे सगुणोत्पन्नो घटः चाक्षुषोतां समर्थित न त्वेवं सगुणोत्पत्त्या द्वितीयक्षणे एव घटः चाक्षुष
तोपपत्तेः। ननु प्रथमक्षणे तत्र कारणं तत् तस्य रूपस्येवोत्पत्तेः। कार्यं तु तस्य चाक्षुषप्रत्यक्षस्य प्रथम ॥१९॥
१९ क्षणे एवोत्पत्तुमर्हत्वादिति संक्षेपः। द्वितीयादिक्षण इत्यत्रा तद्गुणसंविज्ञानबहुव्रीहिणा तिसादिक्ष
णपरिग्रहस्योपपत्तये इति निरुक्तं विशेषणे त्रिगुणाश्रयत्वमिति गुणात्यंताभावानधिकरणत्वं द्रव्यल
क्षणं प्रथमक्षणोपपत्ति प्रागभावे सत्त्वेप्प — त्यंताभावे सत्त्वादित्यर्थः। यत्समवायिकारणेति न चेताव
घ१

तासमवायिकारणत्वात्यासन्नं चेति से कारणत्वं समसमवायिकारणत्वमित्यर्थकं भवतीति तद्धायानुपप
त्तेः समवायिकारणत्वास्तैरेव क्रमशाक्षचोत्वात् नतोव समवायिकारणसमवेतत्वं सवे समवायिका
रणत्वात्प्रत्यासन्नत्वं घटरूपासमवायिकारणे तंतुरूपे नावात् घटरूपसमवायिकारणे पटे समवेत यि४
त्वान्नापि समवायिकारणसमवायिकारणसमवेतत्वं पटासमवायिकारणे तंतुसंयोगे संवात पट
समकारणतंतुसमवायिकारणे घंशुषु तंतुसंयोगस्यासमवेतत्वान्नापि कश्चित्तद्दोषचिदिदमनन्वग्रमाद
श्रेत्राह। कार्यकारणान्यावलक्षणसंबंधनिरूपकसंबंधेकार्थसमवायिकारणत्वमसमवायिकारण
म१

त्वं कार्यकारणभावनिरूपकौ तंतुपटौ तन्मध्ये कार्येण पटेन कार्यसमवायी तंतुसंयोगस्तंतुद्वयस्संयो
गयोः समवायात् तेन रूपेण तंतुसंयोगः पटकारणमिति नवत्वसमवायिकारणं एवं कार्यकारणभाव
निरूपके पटपटरूपे तन्मध्ये कारणेन पटेन कार्यसमवायितंतुरूपं तंतुषु तंतुरूपपटयोः समवाया
त् तेन रूपेण तंतुरूपं पटकारणमिति ननु कार्यकारणभावनिरूपके आत्मसुखे तन्मध्ये कार्येण ॥२०
२०॥ सुखेन कार्यसमवाय्यदृष्टं आत्मनि द्वयोः समवायात्। कारणं च न भवतीति कथं नासमवायिकारण
मिति चेन्न तत्र निरूक्ते कार्यसमवायित्वे सत्यपि तेन रूपेण कारणत्वाभावात् प्रमाणाभावान्न चा

त्मनः संयोगादीनामपि तथा कारणत्वे किं प्रमाणं साध्यवाकी दात्मनो योगत्वादिति नैकैव कारणोपगमो चि
त्यात् तं न त्वो। तं नित्यभावत्वे न जन्यतायामनुपगमे तया समसमवायिकारणानां तंतुसंयोगादीनां तेनैव रूपे
वद ण कारणत्वमुचितमन्यथाननुगमादिति वाच्यं। अनित्यभावत्वस्योपाधितया कार्यतावच्छेदकत्वे प्रमाण
भावात्। कार्यमात्र एतिजाते रेव कार्यतावच्छेदकत्वे नैष्यत्वान्तु पाधीत क्वाचित्कत्वात किं चैतद्रूपम
दृष्टादावतिव्याप्ति न चानेन रूपेण कारणत्वेति तस्मादतिप्रसक्तस्यास्य कथं कारणतावच्छेदकतान
नुमास्तु सामान्यतः कारणता विशेषकारणतावच्छेदकएवतु तत्रावशिष्टं कार्यकारणभावनिरूपकसं

गोचरध्वन

२१॥

बंध्येकार्थसमवायित्वावच्छिन्नतंतुद्वयसंयोगत्वादिना कारणत्वस्य पटत्वादिना कार्यत्वस्याप्रत्यक्षत्वा
त् एवं च कारणताग्रहादौ नास्ति तत्र लाघवेनोद्दिष्टत्वेनैककारणत्वात् तथा कारणत्वे प्रमाणाभावात्
यथा च निरूक्तसमवायित्वघटितं धर्मेण कारणत्वमेवासमवायिकारणत्वपर्यवस्यतीति चेत्तन्न तं
तुसंयोगादीनामपि तथा कारणत्वे प्रमाणाभावात् लाघवेन तंतुसंयोगत्वादिनैव कारणत्वात् ननु पट
तंतुरूपतो वदवस्थं पटरूपकरणेऽतितयोः प्रत्यासत्तिरपि कारणे कारणप्रत्यासत्तेः कारणत्वोत्सार्च
न्योन संभवत्येवेत्येकार्थसमवायो वाच्यः एवं च सकारणैकार्थसमवाये पर्यवस्यति तथा च यस्य कार्यस्य

सं०गोच०

॥२१

कारणताव निरूपकसंबध्येकार्थसमवायोपि कारणं सोसमवायिकारणमिति लक्षणं निर्दुष्टमिति चेन्न तथा
पि तंतुसंयोगकार्यैकार्थसमवायस्य कारणत्वे प्रमाणाभावात् कारणप्रत्यासत्तेरपि कारणत्व नियमेन कार
णैकार्थसमवायस्यैव पूर्वोक्तया च दीयरित्या कारणत्वे पटतंतुरूपयोः कारणत्वमेव न स्यात् विनिगमनावि
रहेपि नावच्छेदकत्वेनान्यथासिद्धत्वादिति विनिगमनाविरह निर्वाहाय तादृशार्थसंबंधत्वतंतुरूपत्वेन
कारणता वाच्या तथा च यत्र तादृशासमवायित्वं कारणतावच्छेदकं तदसमवायिकारणमिति चेन्न एवं सति पटे
तिप्रसक्तेः तत्राप्यन्यथासिद्धिपरिहाराय तादृशसंबंधवत्पटत्वेन कारणत्वस्वीकारोचित्यात् ननु पटेन कार्यनिरू

पितएकार्थसमवायःकार्यस्यपटरूपेपटेसमवेतत्वात्तत्रपटासमवायात्नापिकारणेनपटेनैकार्थसमवायःअन्यदेत
न्निरूपितेकार्थसमवायस्यतत्राभावात्एवंचनपटेतिप्रसंगःकार्यकारणभावसंबंधनिरूपकसंबंधिनिरूपि
तेकार्थसमवायस्यपटेसत्वेतेनरूपेणकारणत्वाभावात्इतिचेन्नएवमपितंतुसंयोगादेरसमवायिकारणत्वा
समर्थनात्नहितत्रकार्यप्रत्यासत्तेःकारणत्वेप्रमाणम्प्रमाणमस्तियेनान्यथासिद्ध्येप्रत्यासत्तिरवच्छेदिकास्यात्तन्न
तुयत्रबहुतंतुकःपटःतत्रतंतुसंयोगोतंतुसंयोगावान्यसमवायिकारणंस्यात्नचैवविनिगमकाभावात्एवं
चतेषामपिपटस्यरप्रत्यासत्तिरपेक्षितासाचैकार्थासमवायरूपैवास्याएकतंतु

तंतुसंयोगकार्येणपटेनसहिकार्थसमवायस्यपरतंतुसंयोगेसत्वात्पक्ष्वतंतुकार्यापितिसाकार्यैकार्थप्रत्या
सत्तिरेवपर्यवसंनातथाचैकत्रसंयोगस्यतथाप्रत्यासन्नत्वेनजनकत्वेऽन्यत्राप्यन्यत्रकेक्षन्यायेनसिद्धंन्न
वतिचेन्नकर्मणिसंयोगासमवायिकारणेसंयोगलक्षणकार्यप्रत्यासत्तेःकारणत्वेप्रमाणाभावात्दितिन
किंचिदेतत्ननुसमवायिकारणप्रत्यासन्नत्वेसतिकारणत्वमेवासमवायिकारणत्वंनचैतन्निमित्तकारण
गच्छतितत्रसमवायिकारणप्रत्यासन्नेरत्नावात्यत्रसमवायिकारणंकारणंतत्रयत्कारणंतस्यैवसमवायि
कारणप्रत्यासन्नपदेनाभिग्रहणात्नचैवंनिमित्तकारणंरतस्यसमवायिकारणावृत्त्येऽभावेपिकारणत्वा

तन्गोवर०

त्तिं दिति चेन्न समवायिकारण एवातिप्रसक्तेः नेदगन्तं नैकत्वं विवक्षितमिति चेन्न यानिमित्तकारणमीतात्ना
वमात्रनिरूपितातत्प्रतिप्रसक्तेः यः कारणताविनाजकोपाधिः समवायिकारणकार्यनिरूपितौ कारणता
नियतः स्तत्वम समवायिकारणत्वं न चैवं निमित्तं कारणविनाजकस्य निमित्तकारणत्वमत्र न तदवच्छि
न्नस्वरूपयोग्यत्वं पटासमवायिन्यपि तंतौ संयोगस्य पटस्य स्वरूपयोग्यत्वात् तंतुरूपस्य पटरूपस्य स्वस
पयोग्यत्वात् किंतु फलोपधानं तंतुयोगादौ ते नावच्छिद्यत इति चेन्न समवायिकारणतादाविवेरेतरस
समवधाने नैनिवतदवच्छेदात् नेतु समवायिकारणातिरिक्तत्वसति कार्यनाशनजनकौ नानाशप्रतियोगित्व २३॥ ॥२३

मसमवायिकारणत्वमिति चेन्न द्वित्वनाशप्रयोजकनाशप्रतियोगिनामपेक्षाबुद्धेरगत्वात् मनःसंयोगा
दिनाशेपि धर्माद्युत्पत्तेश्च अन्यो न्याश्रयापत्तेश्च तौ यथा हि निमित्तकारणेतरकारणनाशत्वेन तावन्नाश
कत्वावाच्यात तथा चैतदवच्छेदकत्रितीनो तथा कारणत्वयत्र लक्षणं ग्रहस्त प्रहेतुनिमित्तकारणता ग्रहइ
ति नतु भावकार्यस्य काचित् नियामकं कारणमसमवायिकारणं यत्र तु संयोगो समवायितत्रैव तन्
न्यपटसमवायात् एवं यत् समवायिकारणतंतुरूपं समवायितत्रैव पटे तज्जन्यरूपसमवायात् दिति चे
न्न येन तंतुना तुरियसंयोगो निमित्तं जातस्तत्र पटसमवाय इत्यस्यापि नियामकस्य वक्तुं शक्यत्वात् तुरियसं

योगस्य वृत्तिनियामकत्वे समवायस्यापि स्वरूपवृत्त्यापत्तेः। कार्यप्रागभावस्यैव नियामकत्वौचित्यात्। यत्र यत्कार्य
प्रागभावस्तत्र तत्समवायात् यत्तु तेनान्तीकृता समवायिकारणलक्षणे ऽदृष्टभिन्नत्वं विशेषणमुपात्तं तद्य
दि यथाश्रुतमेव तदा तुरीतंतुसंयोगाद्युच्चारणीयादौ निमित्तकारणभिन्नत्वं परं तदात्योन्याश्रयग्रस्तं यद
२४॥ दृष्टादृष्टादौ न दोषः स चेपि नासमवायिकारणपदप्रयोगः अदृष्टवदात्मसंयोगादौ इति तत्रैव प्रतीयात तदपि नञ्प्र ॥२४
पास्निध्वंसे ताततु रितंतुसंयोगस्य पटासमवायिकारणत्वे तन्नाशे तन्नाशापि चेष्ट्वशात्कविशेषात् समवायि
कारणत्वमिति मीमांसकमते शेषात्। अवयवरूपत्वविशेष इति बौद्धमते। तस्मादेदकातावान्निमित्तका

रणादसमवायिकारणं भिद्यत इति समवायिकारणत्वं निमित्तकारणत्वमिति एव कारणे। न च तंतुद्वयसंयो
गनाशात्पटनाशापत्तिः अपेक्षाबुद्धिवदुपपत्तेः। न च निमित्तकारणेतरकारणनाशत्वेन तस्यासंग्रहे ऽन
नुगतनाशत्वापत्तिः। इष्टत्वात् अनुगतस्यासंभवात् कार्येष्वननुगमात्। अत्र केचित् असमवायिकारण
त्वादौ ऽदृष्टादिशब्दावच्छिन्नापि तथा चावयवमात्रसंयोगत्वेन द्वयासमवायिकारण एवं तत्तदसमवायिकारणल
क्षणनिर्वाच्यं न वाननुगमः अदृष्टादिवदुपपत्तेरिति॥ स्वरूपसंबंधविशेष एवेत्यपरे अखंडोपाधिरूपमेव तद्
अनोवच्छेदकसखंडोपाधिर्जातिश्चासंभवादित्यन्ये विशदयंति। यत्र समवायीति यत्कार्ये तत्समवायिकारणे

नाप्यसमवायिकारणं अथ च कारणांतं तत्र निमित्तकारणमित्यर्थः॥ दंडादीनां अपि कचिदसमवायिकारणतया
चक्रभ्रमादीनामपि कचिदसमवायिकारणतया सामान्यतोदेन्नेदस्यासिद्धेः॥ नन्विदमभावनिमित्तं व्याप्तंत
स्यसमवायिकारणाद्यप्रसिद्धेः। न च भावनिमित्तस्यैवेदं लक्षणं अभावेत्वभावं प्रति अनन्यसिद्धनियतपूर्व
वर्त्तित्वमिति वाच्यं अभावकारणमभावनिमित्तमित्यनयोः पर्यायत्वापत्तेरिति चेन्न प्रकृतकार्यनिष्ठप्रतियो
ग्यनुयोगिभावसंबंधाश्रयसमवायिकारणादिभिन्नत्वं विवक्षितमिति तद्ध्वंसस्थलेपि प्रसिद्धं तत्र प्रतियो
गिनः समवायिकारणादिसत्त्वादिति केचित्। तन्न संयोगिनः संयोगध्वंसप्रतिनिमित्तत्वाभावापत्तेः॥ न चेष्टापत्तिः

घटे संयोगध्वंस उत्पन्न इति प्रतीत्या तस्याधिकरणत्वेन प्रतीयमानस्य तस्य कारणत्वात् न ह्यधिकरणमका
रणमित्यभ्युपगमः। कालादीनामपि करणत्वे तस्यैव प्रमाणत्वात्॥ अभावकारणत्वाभावनिमित्तत्वयोर
भेदस्यादोषत्वस्वीकार एवात्र परमं तत्त्वमिति भावनिमित्तस्यैवेदं लक्षणमिति तत्त्वं यथा चेति अगृहीत
यथार्थज्ञानत्वं प्रमात्वं तत्करणत्वं च प्रमाणत्वमित्यर्थः। अन्यथा त्रमातिव्याप्तेः स्मृतिभिन्नत्व पदेनैव
स्मृतिवारणमुचितं न त्वगृहीतत्वाहितापदेन स्यादेवं घटोयमिति द्वितीयादिज्ञानविशिष्टद्वितीयादिज्ञाने मा
सातः प्रथमादिज्ञानेनागृहीत एवेति शंकते न चेति॥ नेदयदेहीति तेषां योग्यतया तत्र ज्ञातं भेदस्यापि योग्यतया

क्रियादिग्राहिणा प्रत्यक्षेण क्रियाद्युत्पादक्षणस्यापि तन्त्वेन ग्रहे एकक्षणवृत्तिमात्रो न स्यादित्यर्थः॥ ननु यो
ग्यस्यापि नैदस्य सामग्रीविरहेणाग्रहे भ्रमः स्यादिति चेन्न लक्षणस्यायोग्यत्वस्य सर्वसंमतत्वात्॥ यस्मिन्नति
क्रियानवर्त्तेव तत्करणं न च भ्रमात्रादितुल्ये तादृशत्वात इति साक्षात्कारीति अत्र यथा नातिप्रसंगः तथात्र
माणालक्षणानुसारेण मंतव्यं येंद्रियजेति न चेश्वरप्रमायामव्याप्तिः तस्या लक्षणत्वात् न च मनोजन्यत्वे
नानुमित्यादावतिव्याप्तिः इंद्रियत्वेन तज्जन्यत्वस्य विवक्षितत्वात् योजनाहीनं संबंधानवगाहि निर्वि
कल्पकमित्यर्थः॥ ज्ञौ योजनात्मकं संबंधावगाहि सविकल्पकल्पकमित्यर्थः॥ हानादिबुद्धिः अनिष्टसाध

दि

नतो बुद्धिः अधिकं तत्र तत्संयुक्तसमवायातिरिक्तमित्यर्थः॥ तेषु सत्स्वेवायमेतावानिति यत्र हादिभाव॥ परि
माणादिग्रहे दीर्घत्वादिग्रहेनात आदिपदविरोधः उत्कर्षादिविशेषावच्छिन्नपरिमाणग्रहे चक्षुस्य संनि
कर्षः कारणमिति हृदयं न च तावता संयुक्तविशेषणतैव प्रत्यासत्तिरुक्ता तथा सति पीतरक्तघटा
चप्रत्यासत्तिर्न स्यात् पीतरूपस्य चक्षुरसंयुक्तत्वात् अत एवाहितदेवमिति संक्षिप्तेन संबंधविशेषणता
शब्देन संयोगादिषट्कान्यतमसंबंधसंबद्धविशेषणतोक्ता इति भावः॥ अर्थजन्यं ज्ञानं प्रत्यक्षं तत्र
घटस्य पारमार्थिक एव जनकः पारमार्थिकौ ता तु व्यक्तेरवच्छेद सामान्यस्य तस्याभावात्मकस्याभावात् तत्र व

ता॰ गोचर

२१॥

व्यावृत्तेरेवबद्धस्वरूपत्वात् व्यावृत्तेश्चाभावात्मिकायास्तुच्छत्वात् तस्माद्व्यक्तिविषयकतयाऽर्थजन्यं नि
र्विकल्पकं प्रत्यक्षं सविकल्पकं तु सामान्यविषयकतयार्थजन्यं न प्रत्यक्षमिति ज्ञंकते नन्वेवं निर्विकल्प
कमिति परमार्थसत्स्वलक्षणं परमार्थसती व्यक्तिः॥ एतावता तद्विषयस्यपारमार्थिकत्वेन जनकत्वे
न नवं तु तस्य प्रत्यक्षत्वे तात्पर्यः॥ अननुगताकारत्वं सामान्यस्य तुच्छहेतुत्वे हेतुः॥ तन्मते प्रमाणिकस्य देश
कालाननुगतत्वात् क्षणिकत्वात् एकदेशस्थायित्वाच्च तत्त्वाशयः सामान्यस्य वस्तुत्वे तत्त्वादिति प्रमतस्तस्य
भावरूपत्वमेवाभावरूपत्वं च नापि न तुच्छता तस्यापि प्रमाणिकत्वात् देशकालाननुगमश्च न तुच्छताप्रयोजक

गोचर ध्वंसी

॥२१

त्वं नन्वेवं स्वसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामानाधिकरण्यं व्याप्तिरिति चेन्न इदं सं
योगि द्रव्यत्वादित्यत्राव्याप्तेः॥ साध्यतावच्छेदकावच्छिन्नसाध्यात्यन्ताभाववद्वृत्तित्वमिति चेन्न घटोऽस्ति
धेयः प्रमेयत्वादित्यत्राव्याप्तेः तस्यात्यन्ताभावाप्रसिद्धेः॥ अत एव साध्यवदन्योन्याभाववद्वृत्तित्वमपि
न व्याप्तिः॥ अथ स्वसमानाधिकरणप्रतियोगिसमानाधिकरणात्यन्ताभावाप्रतियोगिसाध्यसामाना
धिकरण्यमिति चेन्न अयं संयोगी समान्याभाववत्त्वादित्यत्र द्रव्ये व्यभिचारिण्यतिव्याप्तेः॥ द्रव्ये संयोगे न स
मानाधिकरणस्यापि संयोगात्यन्ताभावस्य संयोगसामान्याभावाभावस्य विरोधाभावे प्रतियोगिसमानाधि

करणत्वात्॥ संयोगलक्षणाभावे सामान्याभावस्यैव विशेषाभावस्यापि प्रतियोगित्वात्। ननु यत्किंचित्प्रति
योगिसामानाधिकरण्यपि यावत्प्रतियोगसामानाधिकरण्यं तत्रास्त्येव॥ सामान्याभावेन प्रतियोगिना॥
सामानाधिकरण्यत्वादिति चेन्न अयं संयोगविशेषाभाववान् सत्त्वादित्यत्राव्याप्तिरिति चेन्न साध्यसामाना
धिकरण्यावच्छेदकरूपस्य व्याप्तित्वात् यातीदं तत्त्वक्षणं पर्वतो वह्निमान् धूमादित्यत्र धूमत्वस्य वह्निसामानाधिक
२८॥ रण्यावच्छेदकरूपस्य त्वात्॥ व्यभिचारिणि च नयातितत्र वह्नित्वस्यानवच्छेदकत्वात्॥ अभिधेयः प्रमेयत्वादि ॥ २०
त्यत्र वगछति प्रमेयत्वत्वस्यावच्छेदकत्वात् सामानाधिकरण्यावच्छेदकत्वं सामानाधिकरण्यानधिकरण

वेन धूमो सिद्धिः क्षणिकत्वस्याप्रमाणिकदिति तार्किकाशयः॥ लिंगपरामर्श इति॥ ननु तस्य चरमकारण
त्वात्कथं प्रमाणता तथा च कथमनुमानता सामान्यालोचनावे विशेषव्याप्तेः अपि च लिंगपरामर्शपदेन व्याप्ति
विषयकपक्षधर्मताज्ञानग्रहे भ्रमे वाप्यवगाहिनी॥ आलोकपक्षधर्मत्वावगाहि निश्चयस्य मूलालंबनेत्वा
तिप्रसंगः॥ एकस्मिन् धर्मिणि तदुभयावगाहन विवक्षायां व्यतिरेकिपरामर्शे व्याप्तिरिति चेन्न पक्षध
र्मतेयस्मिन्निति क्रियात्वस्यैव तस्यैव करणत्वानिर्व्यापारत्वस्य दोषत्वात्तावाद। न चापि चेतादि नोक्तदो
ष॥ व्यभिचारज्ञानाविरोधिपक्षधर्मताज्ञानस्यैव लिंगपरामर्शपदेनाभिधानात्। व्यभिचारज्ञानाविरोधि

तावद्धूमे वह्निव्याप्यत्वज्ञानस्यैवमाभावे वह्न्यभावव्यापकताज्ञानस्यैवेत्युक्तं यथापि धूमे वह्न्यभावसामा
नाधिकरण्यापत्तेः । नन्वेतावता लिंगपरामर्शस्यैव लक्षणं तत्स्वरूपावच्छेदकं चानुमितिकरणत्वमुक्तं न
चैतयोः सामानाधिकरण्यमत आह येन हीति सामानाधिकरण्यमस्त्येवेत्यर्थः । व्याप्तिबलेनेति ननु चे
तावता व्याप्तिरेवोक्ता तं यदर्थगमकं तल्लिंगमित्युक्तेन वर्तते तत्र पक्षतादावतिप्रसक्तेरिति चेन्न
व्याप्तिमतो लिंगत्वात् न तस्य रूपासिद्धेति व्याप्तिं पक्षधर्मत्वं च न विशेषणात् व्याप्तिलक्षणमा
हयत्रेति । अत्र धूमोऽग्निपदमुदाहरणार्थं लक्षणं तत्साहचर्यं तत्पादि । ननु किमिदं साहचर्यनियय

वृत्तित्वमेव सामानाधिकरण्यानधिकरणं नु केवलान्वयिवृत्त्येव प्रसिद्धं तत्र प्रमेयत्वौतादौ नाम वृत्ति
त्वमस्त्येव ननु इदमभिधेयं प्रमेयादित्यत्राव्याप्तिः अत्र हेतुतावच्छेदकस्य प्रमेयत्वस्य सामानाधिकरण्ये
आकाशे सत्त्वादिति चेन्न अत्र वृत्तिमत्प्रमेयत्वस्यावच्छेदकत्वात् ॥ इह च विस्तरो न लिख्यते बालानाम
नुपयोगात् ॥ ननु व्याप्तिर्न स्वरूपसती कारणमिति व्याप्तिबलेनेत्यसंगतमत आह । तस्यां ज्ञातोयामि
तितज्ज्ञानोपयोगादेव तस्या बलत्वमित्यर्थः । तस्य तृतीयमिति व्यभिचारज्ञानविरोधिपक्षधर्मताज्ञानमित्य
र्थः । तृतीयत्वं तु न विवक्षितं व्याप्तिसंस्कारोद्बोधकस्य धूमज्ञानादितिरिक्तस्याभावे व्याप्तिधूमयोरुपस्थापकस्मरणे सति

त्वेष्टे पर्वते प्रथमे येव लिंगपरामर्शोदयात् प्राथमिकव्याप्तिज्ञानापेक्षया द्वितीयक्षणादिपदेक्ष्यपन्नस्य वह्निव्याप्य
धूमवानयमिति प्रथममपि लिंगपरामर्शोदयाच्चात् तस्य च प्राथमिकस्य त्वादिति भावः ॥ नन्वविवक्षितमपि
तृतीयत्वं नोपपद्यते व्याप्तिग्राहककारणं सहचारदर्शनं तं बहुत्वात् अत आह प्रथममिति व्याप्तिग्रहमा
त्स्य तृतीयत्वमिति भावः व्याप्तिग्रहके ऽन्वयोदर्शनमाह मौलानसादाविति तस्य व्याप्तिग्राहकेनामहत्त्वेने ॥३०
ति ननु भूयोदर्शनस्य व्याप्तिग्राहकत्वे मैत्रीतनयत्वस्य श्यामत्वयोरपि व्याप्तिः स्यात् तत्र भूयो व्यभिचारइत्यत ३०॥
आह यद्यपीति रन्ना व्याप्तिग्रमावात्त्वाश्पाद्यात भ्रमो वानाद्यः विपर्ययाभावादित्यर्थः स्मृतेः प्रतीह तथापीति

अन्यस्तु न निवार्यत इति यदि व्यभिचारादर्शनदोषादिसमवधानमिति भावः तत्र विषयाभावमुपपादयति त
थाहीति तस्य प्रयोजकं चेत्किं सिद्धमत आह प्रयोजकस्येति तर्हि तत्रापि कश्चिदुपाधिर्भविष्यतीत्यत आह न
चेति अशक्यत्वादिति अनुमानमात्रोच्छेदकत्वादिति भावः योग्योपाधिव्यतिरेकस्य योग्यानुपलम्भ निश्च
य इत्याह योग्यस्य चेति ननु योग्यानुपलब्धिविषयत्वेऽपि उपाधेर्विद्यमानत्वसंदेह आह यत्रोपाधिरिति योग्या
नुपलब्धिविषयतया अज्ञातउपाधिर्नास्तीत्याह नयेति अनुपलब्धौ योग्यतातर्कितः जातियोगित्वविरोधिता
तत्र तर्कमाह यदीति यावत्त्वं विपर्ययपर्यवसानमा इतत इति तथा करणं चानुमानमेव स्यादिति भावः तथा सतीति

त॰ जीव॰

अनौपाधिकत्वज्ञानं न व्याप्तिग्रह इत्यर्थः। ननु तौपाधिकत्वं न व्याप्तिः यत्किंचित्साध्यव्यापकसाधनाव्या
पकमस्य पर्वतो वह्निमान् धूमादित्यत्र निषेद्धुमशक्यत्वात् गुणव्यापकत्वाभावाच्चाव्यापकसत्त्वात्। तत्र स
त्त्वात् अनन्तसाध्यव्यापकसाधनव्यापकधर्मसिद्ध्यसिद्धौ तन्निषेद्धुमशक्य॥ ननु अनन्तसाध्यव्यापकं यस्य
३१॥ व्यापकं तद्भिन्नः स तस्मिन् साध्ये नौपाधिकः संभवतीति तद्धूमादौ वह्निव्यापकत्वं वह्निसामग्र्यव्याप्यद्रव्य
वादिभिन्नत्वादिति चेन्न केवलान्वयिन्यव्याप्तेः केवलान्वयिसाध्यव्यापकं यद्धर्माव्यापकमित्यर्थः
यदव्यापकं तस्याप्रसिद्धेः। यद्यपि च संस्कारयोः सहकारित्वमुक्तं तदपि न स्मृतिव्यापत्तेरिति चेन्न व्यभिचा

२२

रादर्शनसहचारदर्शनयोर्व्याप्तिग्राहकत्वात् व्यभिचारादर्शनं च व्यभिचारज्ञानाभावः। तच्च शंकासाधारणो
पाधिसंदेहादिसत्त्वे व्यभिचारशंकोपाध्यभावावधारणे सति निवर्त्तनं इत्येतावन्मात्रेण तदवधारणं स्व
व्याप्तिग्रहोपयोगत्वं। तयोर्दर्शनाहितसंस्कारस्यानुकूलत्वं नार इत्याशयः॥ स्मृतिश्च न तावन्मात्रं प्रयोज
कमिति तावत् पक्षधर्मताज्ञानस्यानुमितावुपयोगमादेत्येवेति व्याप्तिज्ञानस्यान्वयव्यतिरेकाभ्यां क्षेपसमा
धानाभ्यामाह नन्विति पक्षतायामुपयोगमाक्षेपसमाधानाभ्यामाहाथेति व्याप्तिज्ञानं कारणं न चानुमानं
कदाचिद्व्याप्तिज्ञानमपक्षिमित्याशयेनाक्षेपसमाधानं करोति अथेति। नन्वाकांक्षाभावाद्धूमज्ञातापि कथं व्याप्ति

सं० गोबर

स्मरणमित्यत्राह धूमेति एकसंबंधिज्ञानेऽपरसंबंधिस्मरणमित्यर्थः तृतीयमित्यनंतरं धूमनिश्चायमिति
क्वचित्पाठः। वह्निव्याप्यधूमवानयमिति तस्यार्थः। स्वप्रतिपत्ति वाक्यप्रयुक्तः परामर्श इत्यर्थः स्वार्थानुमानमि
त्यर्थः। विशिष्टेन सहचारदर्शनाद्धि सहकृतेन। तत्परार्थमिति वाक्यप्रयुक्तः परामर्श इत्यर्थः पंचावयवमिति क
थापि न्यायेन। अन्यथा न्यूनतादोषत्वं वाक्याद् अपि परामर्शोपपत्तेरिति भावः। नन्वेतच्छब्दादेव किमिति न साध्यं प्रति
पद्यत इत्यत्राह। अत्र पर्वत इति अनाप्तोक्तेश्चादिति भावः। नन्वयं त्रिषु क इत्यत्राह स एवेति। अन्वयव्यति
रेकयोर्लक्षणयोः संचोदयमन्वयव्यतिरेकार्थः। अन्वयभावे तिव्यापकानिवृत्तिमिति व्याप्यनिवृत्तिरूपं भावादि

सं० गो० ब०

३२

३२॥

त्यर्थः। व्याप्यस्य वचनमिति यच्छब्दयोगश्चाप्यस्यान्वामेव तत्र व्याप्तिनिश्चयादिति भावः। ननु पंचावयवप्रयोगेण स
र्वत्र व्याप्तिद्वयं तर्हि किमिति न प्रयुज्यत इत्यत्राह यविति अधिकोपपत्तेरिति भावः व्यतिरेक्यपि केवलं कदा
चित्प्रयुज्यत इत्यत्राह तत्रापीति इदं तु सामान्यतः पंचावयवप्रयोगसमयबंधत्वन्वयस्फुत्वेऽज्ञातव्यं उन्नयप्रयो
गसमयबंधेऽचत्वन्वयोः प्रयोगात्केवलव्यतिरेकव्याप्तिसमयबंधे तस्या एव प्रयोगाद् सामान्यासमयबंधेऽपि
व्यतिरेकमात्रस्फूर्तेस्तस्या एव प्रदर्शनादिति भावः। ननु यद्यन्वयिमात्रेणान्वयितास्तदा केवलव्यतिरेकी हे
नैस्यात्तस्यापि पक्षेऽन्वयादित्यत्राह कश्चिदिति। न पक्षान्वयितयान्वयिता किं तु सपक्षेऽन्वयितयेति भावः।

गौ०वृ०

नचेदंजीवच्छरीरंतथाइदंजीवच्छरीरंप्राणादिमत्त्वाभाववन्नभवतीत्यर्थः॥तस्मान्नतथाप्राणादिमत्त्वाभा
वात्भावान्नतथानसात्मकत्वाभाववदित्यर्थः॥पक्षएवानिश्चितसाध्यएवत्रअन्यथायस्यापिसपक्षेचावि
रोधतेअन्वयिनिवह्निमानित्यनुमितिः॥व्यतिरेकिणिनच भाववानित्याकाराअन्वयव्यतिरेकिणप्रत्यया
कारत्यनुतीनांवैलक्षण्यंमतव्यंअन्यथोस्याप्रामाणिकत्वादिति॥व्यतिरेकित्वमपिविपक्षव्यतिरेकितयानतु
व्यतिरेकितामात्रेण॥अयमाकाशात्मंतभाववानकालात्मंतात्भावादत्रअसत्केरित्याकश्चिदिति॥ननुके
वलान्वयिकेवलव्यतिरेकिणो॥कथमनुमानत्वंएकत्रविपक्षव्यावृत्तेरपरत्रसपक्षसत्त्वस्यांगस्याभावादत :

गौ०वृ०४०

अत्रैतेषांचेतितत्रस्वरूपचतुष्टयमेवांगमितिभावः॥संदिग्धेतिननुयत्रसिसाधयिषयानिश्चितेनुमानं
तत्रसंदेहाभावादव्याप्तिरितिचेन्नअनुमित्साविरहविशिष्टसिध्यभावस्यपक्षत्वात्अत्रानुमित्सावि
रहोविशेषणंसिद्धिर्विशेष्यंतदुभयविशिष्टाभावश्चयत्रानुमित्सासिद्धिस्तत्रास्तुअनुमित्साविरहरूपविशे
षणाभावादयत्रानुमित्सासिद्ध्यभावश्चतत्रोभयाभावात्यत्रानुमित्साविरहसिध्यभावोतत्रविशेष्या
भावादितिभावः॥विपक्षइतिनिश्चितव्याप्यवृत्तिसाध्यात्यंताभाववानित्यर्थः॥नातःसंयोगेसाध्येद्रव्यविपक्षतापि
भावः॥हेत्वाभासाः॥येग्रंथस्थव्याख्यास्तथापिकाचित्फक्किकाव्याक्रियतेलिंगेचेनवाप्तिविशिष्टपक्षधर्मचैन

=नायंमूलेग्रंथकरपाठःकेनचित्प्रक्षिप्तस्तद्व्याख्यानमिदंसायफक्किका=
=लिंगत्वेनानिश्चितेहेतुस्वरूपासिद्धइति१

=प्रागभावविनाशी जन्यत्वादित्यत्र भावत्वोपाधौ वायुः। अत एव। प्रमेयत्वादित्यत्र वह्निर्द्रव्यत्वावच्छिन्नपक्षत्वव्यापकत्वं कूतरूपवत्त्वादपक्षस्यार्थः। उ०दि०३ २

त०गो०व० एक इति सहचाराभावादित्यर्थः॥ अपर इति अव्यभिचाराभावादित्यर्थः॥ न च सच्चेति क्षणिकत्वस्याप्रसिद्ध्या मद्दृष्टान्तेऽपि गो०व०

न हेतुः॥ साध्यसहचार इति भावः॥ सोपाधितया चेति तथा च क्षणिकत्वं कचित्प्रसिद्धं स्यादिति भावः॥ साध्यव्यापकत्वे इतिन्

च्चित्साधने पक्षधर्मावच्छिन्नसाध्यव्यापकेन तत्तिन्न च साध्यतावच्छेदकावच्छिन्नसाध्यव्यापकतानविषयत्वं क्षितौ

वक्तुं साध्यव्यापकतामात्रं सा च किंचिदवच्छिन्नसाध्यव्यापकत्वे व्यस्त्येवेति वाच्यं पर्वतो वह्निमान् धूमादित्य ३

त्रं व्यंजनवत्त्वस्योपाधितापत्तेः तस्यापि धूमाव्यापकस्य महानसीयत्वावच्छिन्नवह्निव्यापकत्वादिति चेन्न यत्धर्मा

उ४५ वच्छिन्नसाध्यव्यापकस्तद्धर्मावच्छिन्नसाधनाव्यापकत्वमुपाधिरिति परिनिष्ठानात् व्यंजनवत्त्वस्य च महानसीयत्वाव ३४॥

च्छिन्नसाध्यव्यापकस्य तदवच्छिन्नसाधनाव्यापकत्वात्॥ नित्यधर्मेति नित्यधर्मो ऽकारणकत्वं तद्रहितत्वोऽसका

करणकत्वादित्यर्थः॥ अनित्यधर्मेति अनित्यधर्मो ध्वंसप्रतियोगित्वं तद्वत्तया ऽनुपलभ्यमानत्वादित्यर्थः॥ उप

